# संस्कृतवार्ता:

**दिनाङ्क :-27.08.2025** **प्रात: - 06:55**

**जम्मूजलप्लवः**

गतचतुर्विंशतिहोरासु अविरतवृष्ट्या सम्पूर्णे जम्मू-विभागे जलप्लावनेन आपतस्थितिः समुत्पन्ना अस्ति। जलप्लावकारणेन न्यूनातिन्यूनं दश जनाः मृताः। माता वैष्णोदेवी-तीर्थ इत्यस्य तीर्थयात्रा अपि स्थगिता अस्ति। प्रचण्डवृष्ट्या त्रिकूटपर्वतशिखरस्य तीर्थं प्रति गच्छन्तः मार्गे भूस्खलनेन षट् जनाः मृताः, अष्टादश जनाः च व्रणिताः सन्ति। हिमकोटी-मार्गः अपि निरुद्धः अस्ति। डोडा-मण्डले अपि चत्वारः जनाः मृताः। जम्मू-प्रदेशस्य केषुचित् क्षेत्रेषु विद्युत्-आपूर्तिः, अन्तर्जाल-सेवाः च बाधिताः सन्ति। आपत्कालीनसेवाः विहाय सर्वे सर्वकारीयकार्यालयाः अद्य पिहिताः भविष्यन्ति। अत्रान्तरे, प्रभावितमण्डलेषु उद्धारकार्येषु, जलप्लावनसंरक्षणे च संलग्नाः सर्वकारीय-अधिकारिणां अवकाशाः निरस्ताः कृताः।

**रेलसेवा**

प्रचण्डवृष्टिकारणेन उत्तररेलसमवायेन जम्मूतः जम्मूं प्रति च अष्टादशरेलयानानां सेवाः निरस्तीकृताः। कटरा-उधमपुर-जम्मू-रेलस्थानकेषु निरन्तरं प्रचण्डवृष्ट्या विनाशस्थितिः समुत्पन्ना अस्ति। निरस्तानां रेलयानानां विषये अधिकारिणः अवदन् यत् माता वैष्णोदेवी-देवालयस्य आधार-शिबिरात् कटरा-नगरात् सप्त, उधमपुर-नगरात् द्वे, जम्मू-नगरात् एका च रेलयानसेवा निरस्तीकृता इति।

**शासनम्-शिक्षाः**

शिक्षा-प्रदाने सर्वकारीय-विद्यालयानां महत्त्वपूर्णं योगदानं वर्तते । इमे हि सम्पूर्णे देशे, आहत्य नामाङ्कनेषु प्रायः षट्पञ्चाशत् प्रतिशतं भागः सर्वकारीयविद्यालयानां वर्तते । ग्राम्यक्षेत्रेषु एषा सङ्ख्या अधिका अस्ति, यत्र षट्षष्टिः प्रतिशतं छात्राः नामाङ्किताः सन्ति।। कम्प्रिहेन्सिव्-माड्युलर्-सर्वे-एजूकेशन्, 2025 इत्यस्य अनुसारं, राष्ट्रव्यापिरूपेण नामाङ्कनानां प्रायः द्वात्रिंशत् स्वायत्त-अनुदानरहित-मान्यताप्राप्त-विद्यालयाः सन्ति। वर्तमान-शैक्षणिकवर्षे सर्वकारीय-विद्यालयेषु विद्यालय-शिक्षायाः अनुमानितः प्रतिछात्रं व्ययः प्रायः त्रिषष्ट्युत्तराधिकद्विसहस्रं रूप्यकाणि वर्तते, परन्तु तदपेक्षया निजीविद्यालायानां प्रतिछात्रं व्ययः पञ्चविंशतिसहस्रतोपि अधिकः वर्तते।

**राष्ट्रपति-गणेशचतुर्थी-**

अद्य गणेशचतुर्थी इति पर्व सम्पूर्णे देशे सोत्साहं परिपाल्यते। राष्ट्रपतिपदासीना श्रीमतिः द्रौपदी मुर्मू सर्वेभ्यः अस्मिन् अवसरे शुभाशयाः प्रदत्तवती। स्वसन्देशे राष्ट्रपतिः अवदत् यत् अयं उत्सवः भक्त्या उत्साहेन च आचर्यते । भगवान् गणेशः ज्ञानस्य कल्याणस्य च स्रोतोरूपेण पूज्यते एतदवधाय जनाः नूतनस्य आरम्भस्य, बाधायाः निवारणस्य च कृते तस्य आशीर्वादं याचन्ते ।

**राष्ट्रे गणेशचतुर्थीः**

अयं दिवसः भगवतः गणेशस्य जन्मदिवसत्वेन परिपाल्यते। यः हि ज्ञानस्य, समृद्धेः, सौभाग्यस्य च प्रतीकः अस्ति। विनायकचतुर्थी अथवा गणेशउत्सवः इति नाम्ना अपि प्रसिद्धः अयं दिवसः दशदिवसीय-उत्सवस्य आरम्भं सूचयति, यस्मिन् समये जनाः स्वगृहेषु भगवतः गणेशस्य मृत्तिका-विग्रहान् स्थापयित्वा तेषां पूजां कुर्वन्ति। उत्सवः गणेश-विसर्जनस्य भव्य-कार्यक्रमेन समाप्यते।

**उज्जैन-आध्यात्मिक-निर्णयः**

भाजपाशासितमध्यप्रदेशसर्वकारः अद्य उज्जैनी-नगरे वैश्विक-आध्यात्मिक-सम्मेलनस्य आयोजनं करोति। पर्यटनमन्त्रालयस्य साहाय्येन पर्यटनविभागेन आयोजितस्य कार्यक्रमस्य उद्घाटनम् भविष्यति।

**प्रधानमन्त्री-जापान-यात्रा**

प्रधानमन्त्री श्रीनरेन्द्रमोदी गुरुवासरे स्वाधिकारिकयात्रार्थं जापानदेशं प्रति प्रयास्यति। श्रीमोदी मासस्यास्य ऊनत्रिंशत् अथ त्रिंशत् दिनाङ्कयो: जपान-देशैव भविष्यति।

**॥इति वार्ता:॥**